# प्रश्नपत्र–योजना

**कक्षा- दशमी (माध्यमिकः)**

**विषयः-संस्कृतम् (तृतीयभाषा)**

**अवधिः-3 घण्टे 15 मिनट (सपादहोरात्रयम्)** **पूर्णांकाः - 80**

1. उद्देश्यानाम् अंकभारः –

| क्र.सं. | उद्देश्यम् | अंकभारः | प्रतिशतम् |
|---|---|---|---|
| 1. | ज्ञानम् | 26 | 32.50% |
| 2 | अवबोधः | 28 | 35.00% |
| 3. | ज्ञानोपयोगः | 15 | 18.75% |
| 4 | कौशलम् | 05 | 6.25% |
| 5 | विश्लेषणम् | 06 | 7.50% |
| योगः | | 80 | 100% |

2. प्रश्नानां प्रकारानुसारम् अंकभारः–

| क्र. सं. | प्रश्नानां प्रकाराः | प्रश्नानां संख्याः | प्रतिप्रश्नम् अंकाः | कुलाकाः | प्रतिशतम् अंकानाम् | प्रश्नानां प्रतिशतम् | सम्भावितः समयः |
|---|---|---|---|---|---|---|---|
| 1. | बहुविकल्पात्मकप्रश्नाः | 1 | 1 | 17 | 21.25% | 31.48% | 25 निमेषाः |
| 2 | रिक्तस्थानम् | 1 | 1 | 05 | 6.25% | 9.26% | 15 निमेषाः |
| 3 | अतिलघूत्तरात्मकप्रश्नाः | 4 | 1 | 15 | 18.75% | 27.79% | 40निमेषाः |
| 4 | लघूत्तरात्मकप्रश्नाः | 7 | 2 | 22 | 27.50% | 20.37% | 32निमेषाः |
| 5 | दीर्घोत्तरीयप्रश्नाः | 3 | 3 | 9 | 11.25% | 5.55% | 33निमेषाः |
| 6 | निबन्धात्मकप्रश्नाः | 3 | 4 | 12 | 15.00% | 5.55% | 50निमेषाः |
| योगः | | 19 | | 80 | 100 | 100% | 195 निमेषाः |

3. विषयवस्तूनाम् अंकभारः –

| क्र. सं. | विषयवस्तु | अंकभारः | प्रतिप्रश्नम् अंकाः |
|---|---|---|---|
| 1. | अपठिताबबोधनम् | 08 | 10.00% |
| 2 | रचनात्मककार्यम् | 15 | 15.00% |
| 3 | अनुप्रयुक्तव्याकरणम् | 25 | 30.00% |
| 4 | पठितावबोधनम् | 32 | 40.00% |
| योगः | | 80 | 100 |

BSER

**प्रश्न-पत्रस्य नीलपत्रम् (ब्ल्यू प्रिन्ट)**

**कक्षा- माध्यमिकः कक्षा-दशमी** **विषयः - संस्कृतम्** **पूर्णांकाः – 80 अङ्काः**

| क्र. सं. | उद्देश्यविधाः/उपविधाः | ज्ञानम् | | | | | | अवबोधः | | | | | | ज्ञानोपयोगः / अभिव्यक्तिः | | | | | | कौशलम्/मौलिकता | | | | | | विश्लेषणम् | | | | | | योगः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | वहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | वहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | वहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | वहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | वहुविकल्प.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | |
| 1. | अपठित–अबबोधनम् | | | | | | | | | 3(1) | 2(-) | | | | | 3(-) | | | | | | | | | | | | | | | | 8(1) |
| 2. | रचनात्मककार्यम् | | | | | 1(1) | | | | | | 1(-) | 3(1) | | | | | 1(-) | | | | | 1(-) | 1(-) | 1(-) | | | | 2(1) | | 4(1) | 15(4) |
| 3. | अनुप्रयुक्तव्याकरणम् | 10(1) | 3 (1) | | 2(1) | 3(1) | | | 2(-) | | 2(1) | | | | | | | 3(1) | | | | | | | | | | | | | | 25(6) |
| 4. | पठित-अवबोधनम् | 7(-) | | | | | | | | 9(3) | 6(3) | | | | | | 8(1) | | | | | | 2(1) | | | | | | | | | 32(8) |
| | योगः | 17(1) | 3(1) | | 2(1) | 4(2) | | | 2(-) | 12(4) | 10(4) | 1(-) | 3(1) | | | 3(-) | 8(1) | 4(1) | | | | | 3(1) | 1 (-) | 1(-) | | | | 2(1) | | 4(1) | 80(19) |
| सर्वयोगः | | 26(5) | | | | | | 28(9) | | | | | | 15(2) | | | | | | 5(1) | | | | | | 6(2) | | | | | | 80(19) |

विकल्पयोजना :- खण्ड–स–द–योः” प्रत्येकम् एकः प्रश्नः आन्तरिकविकल्पात्मकः अस्ति । अवधेयम् – कोष्ठकात् बहिः संख्या अंकबोधिका आन्तरिकसंख्या च प्रश्नबोधिका ।

BSER

No. of Questions-19

No. of printed Pages

**माध्यमिकपरीक्षा,2025**

**आदर्शप्रश्न–पत्र**

**Model Paper**

**कक्षा–10वीं**

**Class-10th**

**विषयः - संस्कृतम्**

**Sub: Sanskrit**

**समयः 3:15** (सपादहोरात्रयम्) **पूर्णांका: – 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः-**

(1 ) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांकः अनिवार्यतो लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः।

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेख्यानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेख्यानि।

(5) सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि ।

BSER

Join Channel For Free Study Materials

YouTube WhatsApp Telegram

BSER

# आदर्शप्रश्नपत्रम् -2025

## कक्षा - दशमी

## विषयः – संस्कृतम् (तृतीयभाषा)

## खण्डः "अ"

### 1. बहुविकल्पात्मकप्रश्नाः -

**(i) केषां माला रमणीया ?** **1**

(अ) हरिततरूणाम् (ब) वायुमण्डलानाम् (स) पुष्पलतानाम् (द) तारकाणाम्

**(ii) 'राजसिंहः नाम राजपुत्रः कस्मिन् ग्रामे निवसति स्म ?** **1**

(अ) भानपुराख्यग्रामे (ब) देवपुराख्यग्रामे (स) देउलाख्यग्रामे (द) झरनाख्यग्रामे

**(iii) 'आवां यमलौ' कौ तौ ?** **1**

(अ) श्रीहर्षकालिदासौ (ब) रामलक्ष्मणौ (स) कुशलवौ (द) सूर्यचन्द्रमसौ

**(iv) कः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् ?** 1

(अ) नृपः (ब) सुराधिपः (स) कृषकः (द) सुरभिः

**(v) अविचलः ध्यानमग्नः स्थितप्रज्ञः कः ?** **1**

(अ) काकः (ब) मयूरः (स) वानरः (द) बकः

**(vi) पिता कस्य रुग्णातामाकर्ण्य व्याकुलो जातः?** **1**

(अ) पितामहस्य (ब) तनूजस्य (स) न्यायधीशस्य (द) आरक्षीजनस्य

**(vii) भूकम्पविभीषिका भारतदेशे कस्मिन् दिवसे अभवत् ?** **1**

(अ) स्वाधीनतादिवसे (ब) गणतन्त्रदिवसे (स) दिपवल्याःदिवसे (द) ग्रीष्मकालदिवसे

**(viii) अस्मात् + नगरात् इत्यस्य सन्धिपदमस्ति-** **1**

(अ) अस्मान्नगरात् (ब) असमान्नगरात् (स) असमाद्नगरात् (द) असमानगरात्

**(ix) ष्टुत्वसन्धेः उदाहरणमस्ति-** **1**

(अ) अन्वयः (ब) कृष्णः (स) न्यायधीशः (द) मनोहरः

**(X) अनुस्वारसन्धेः उदाहरणमस्ति-** **1**

(अ) रामं वन्दे (ब) नमोनमः (स) यातायातः (द) फलमस्ति

**(xi) "मनस्तु" इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति-** **1**

(अ) मनसि+तु (ब) मन+अस्तु (स) मनः+तु (द) मनो+तु

**(xii) "अलम्" इति पदयोगे का विभक्तिः भवति?** **1**

(अ) द्वितीया (ब) तृतीया (स) चतुर्थी (द) सप्तमी

**(xiii) "प्रति " इति पदयोगे का विभक्तिः भवति?** **1**

(अ) पञ्चमी (ब) सप्तमी (स) तृतीया (द) द्विताया

**(xiv) "आगच्छति" इत्यत्र पदे कः उपसर्गः?** **1**

(अ) वि (ब) आङ् (स) अव (द) अप्

**(xv) "सङ्कोचम्" इत्यत्र उपसर्गं शब्दञ्च पृथक् कृत्वा लिखत-** **1**

(अ) सम् + कोचम् (ब) सङ् + कोचम् (स) सङ्को + चम् (द) सन् + कोचम्

**(xvi) लिख् धातोः लृट्-लकारस्य रूपम् अस्ति -** **1**

(अ) लेखिष्यति (ब) लिखिष्यति (स) लिखति (द) अलिखत्

**(xvii) "सिंहः सर्वजन्तून् <u>पृच्छति</u> " रेखाङ्कितपदे को धातुः ?** **1**

(अ) प्रच्छ्-धातुः (ब) पृष्ट्-धातुः (स) पृच्छ्-धातुः (द) प्रच्तृ-धातुः

**2. निर्देशानुसारं रिक्तस्थानानि पूरयत-**

(i) तर्हि त्वया अहं ....... ...........इति । (हन् + तव्यत् ) **1**

(ii) सर्वेष्वपत्येषु जननी तुल्या ................ एव । (वत्सल + टाप् ) **1**

(iii) यत् कालानुगुणं सर्वेषां ............भवति । (महत्+ त्वम् ) **1**

(iv) प्रजासुखे सुखं......... .., प्रजानां च हिते हितम् । (राजन् शब्दस्य षष्ठीविभक्ति-एकवचनम् ) **1**

(v) तस्यामेव रात्रौ ............ गृहे कश्चन चौरःगृहाभ्यन्तरं प्रविष्टः। (तद्-शब्दस्य सप्तमीविभक्ति-एकवचनम् ) **1**

**3. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-**

अद्य औद्योगिकविकासात् नगराणां विकासाच्च जायते पर्यावरणं प्रदूषितम् । अतः अद्य नागारिकाणां कर्त्तव्यमस्ति यद् वयं पर्यावरणसंरक्षणार्थं प्रयत्नं कुर्मः तत्कृते वयं स्वच्छतां च धारयामः। महात्मागान्धिमहोदयस्यापि स्वच्छतोपरि विशेषाग्रहः आसीत्। साम्प्रतमपि सर्वकारेण "स्वच्छभारताभियानम्" प्रचालितम्। तस्योद्देश्यम् पर्यावरणस्य संरक्षणमेवास्ति । एवमेव नदीतडागवापीनां जलस्य स्वच्छतायाः प्रेरणा वयं "नमामि गंगे" इति अभियानेन ग्रहीतुं शक्नुमः।

**(क) एकपदेन उत्तरत -** **1 x 2 =2**

(i) पर्यावरणे प्रदूषणं कस्माद् जायते ?

(ii) कस्य स्वच्छतोपरि विशेषाग्रहः आसीत् ?

**(ख) पूर्णवाक्येन उत्तरत -** **2**

**(i) स्वच्छतायाः प्रेरणा केन ग्रहीतुं शक्यते ?**

**(ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ।** **1**

**(घ) भाषिककार्यम्** **1 x 3 = 3**

BSER

(i) ' स्वच्छं भारतम् ' इत्यत्र विशेषणपदं लिखत ।

(ii) 'अधुना ' इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।

(iii) 'वयं पर्यावरणसंरक्षणार्थं प्रयत्नं कुर्मः। इत्यत्र "कुर्मः" इति क्रियापदस्य कर्तृपदम् लिखत ।

**खण्डः 'ब'**

**4. आपेदिरेऽम्बरपथं परितः पतङ्गाः । रेखाकिंतपदे विभक्तिं तत्कारणञ्च लिखत ।** **2**

**5. अधोलिखितौ संख्यावाचिशब्दौ संस्कृते लिखत ।** **1x2=2**

**(अ)113 (ब) 48**

**6. 'वानरः आत्मनं <u>वनराजपदाय</u> योग्यं मन्यते । रेखाकिंतपदमाधृत्य प्रश्ननिर्माणं कुरुत।** **2**

**7. अधोलिखितश्लोकस्य हिन्दीभाषायां सप्रसङ्गं भावार्थं लिखत।** **2**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

**8. अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत।** **2**

अवक्रता यथा चित्ते तथा वाचि भवेत् यदि ।
तदेवाहुः महात्मानः समत्वमिति तथ्यतः।।

अन्वयः- यथा(i).......चित्ते तथा यदि (ii).................भवेत्, (iii)................तथ्यतःतदेव. (iv).........इति आहुः।

| |
|---|
| **वाचि, अवक्रता, समत्वम्, महात्मानः,** |

**9. स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात् ।** **2**

**10. " बुद्धिर्बलवती सदा" इति पाठसारं हिन्दीभाषायां लिखत ।** **2**

**अथवा**

**" विचित्रः साक्षी" इति पाठसारं हिन्दीभाषायां लिखत ।**

**खण्डः 'स'**

**11. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्य जगाद-''कथमेकैकशौ व्याघ्रभक्षणाय कलहं कुरुथः ? अयमेकस्तावद्विभज्य भुज्यताम् पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"

**(क) एकपदेन उत्तरत -** **1**

मार्गे गहनकानने सा किं ददर्श ?

**(ख) पूर्णवाक्येन उत्तरत)** **2**

BSER

व्याध्रमागच्छन्तं दृष्ट्वा धाष्ट्यार्त् पुत्रौ चपेटया प्रहृत्य सा  बुद्धिमती किं जगाद ?

**(ग) भाषिककार्यम्-**

(i) " एकं व्याध्रं ददर्श " इत्यत्र विशेषणपदं किम् ? 1

(ii) " व्याघ्रभक्षणाय  कलहं कुरुथः " इत्यत्र क्रियापदं किम्? 1

**अथवा**

**"बहुन्यापत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव ''इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत् "गच्छ वत्से! सर्वं भद्रं जायेत।"**

**(क)** एकपदेन उत्तरत -

कस्मिन् सुते मातुः अभ्यधिका कृपा सहजैव ? 1

(ख) पूर्णवाक्येन उत्तरत - 2

सुरभिवचनं श्रुत्वा कस्य हृदयमद्रवत्।?

**(ग) भाषिककार्यम्-**

(i) " सर्वं भद्रं जायेत।" इत्यत्र सर्वनामपदं किम् ? 1

(ii) " सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। " इत्यत्र कर्तृपदं किम्? 1

**12.** अधोलिखितं श्लोकं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

**कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।**
**वाष्पयानमाला संधावति वितरन्ती ध्वानम्।।**
**यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम् ।**

**(क) एकपदेन उत्तरत -**

का संधावति ? 1

**(ख) पूर्णवाक्येन उत्तरत -**

कठिनं संसरणं कथम् ? 2

**(ग) भाषिककार्यम्-**

(i) " कज्जलमलिनं धूमं मुंचति शतशकटीयानम्। " इत्यत्र क्रियापदं किम् ? 1

BSER

(ii) " यानानां पङ्क्तयो ह्यनन्ताः " इत्यत्र विशेषणपदं किम् ? 1

**अथवा**

**क्रोधो हि शत्रुः प्रथमो नराणाम् , देहस्थितो देहविनाशनाय ।**

**यथास्थितः काष्ठगतो हि वह्निः , स एव वह्निर्दहते शरीरम् ॥**

**(क) एकपदेन उत्तरत -**

नराणां प्रथमो हि शत्रुः कः ? 1

**(ख) पूर्णवाक्येन उत्तरत -** **2**

देहविनाशनाय मूलं किम् ?

**(ग) भाषिककार्यम्-**

(i) " यथास्थितः काष्ठगतो हि वह्निः " इत्यत्र विशेषणपदं किम् ? 1

(ii) " स एव वह्निर्दहते शरीरम् " इत्यत्र क्रियापदं किम् ? 1

**13. अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।**

**रामः - अहमत्र भवतोः जनकं नामतो वेदितुमिच्छामि।**

**लवः - न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।**

**रामः - अहो माहात्म्यम्।**

**कुशः - जानाम्यहं तस्य नामधेयम्।**

**रामः - कथ्यताम्।**

**कुशः – निरनुक्रोशो नाम.......**

**(क) एकपदेन उत्तरत -**

जनकं नामतो वेदितुमिच्छामि इति कः वदति ? 1

**(ख) पूर्णवाक्येन उत्तरत -**

"अहो माहात्म्यम्" इति श्रुत्वा कुशः किं वदति ? 2

**(ग) भाषिककार्यम्-**

(i) " भवतोः जनकं नामतो वेदितुमिच्छामि। " वाक्येऽस्मिन् सर्वनामपदं किम् ? 1

(ii) "अस्मिन् तपोवने तस्य नाम व्यवहरति। " इत्यत्र विशेष्यपदं किम् ? 1

**अथवा**

BSER

सिंहः - (क्रोधेन गर्जन्) भोः! अहं वनराजः किं भयं न जायते ? किमर्थं मामेव तुदन्ति सर्वे मिलित्वा ?

एकः वानरः - यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः।अपि च स्वरक्षायामपि समर्थः नासि।तर्हि कथमस्मान् रक्षिष्यसि?

अन्यः वानरः – किं न श्रुता त्वया पञ्चतन्त्रोक्तिः –

यो न रक्षति वित्रस्तान् पीड्यमाना परैः सदा ।
जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः ॥

**(क) एकपदेन उत्तरत -**

रक्षकः कः भवति ? 1

**(ख) पूर्णवाक्येन उत्तरत –** 2

कं सर्वे मिलित्वा तुदन्ति ?

**(ग) भाषिककार्यम्-**

(i) " भवति परं भवान् तु भक्षकः। " वाक्येऽस्मिन् संज्ञापदं किम् ? 1

(ii) " स्वरक्षायामपि समर्थः नासि। " इत्यत्र क्रियापदं किम् ? 1

**14. यथानिर्देशम् उत्तरं लिखत -** **1+1+1=3**

(क) ग्रामस्य समीपे ( समस्तपदं लिखत)

(ख) पीताम्बरम् (समासविग्रहपदं लिखत)

(ग) दशाननः (समासस्य नाम लिखत)

**15. मञ्जूषायाः प्रदत्तैः समुचितैः अव्ययपदैः वाक्यानि पूरतय।** **1+1+1=3**

| **अपि, सर्वत्र, एव** |
|---|

(क) सत्यम् .......... जयते।

(ख) सः गच्छति,अहम् .............गच्छामि।

(ग) वायुः ................ अस्ति

**खण्डः 'द'**

**16.भवान् राजकीय – उच्च – माध्यमिक – विद्यालयस्य दशम्याः कक्षायाः छात्रः नवीनोऽस्ति। भवान् रुग्णोऽस्ति । स्वकीयं प्रधानाचार्यं प्रति दिनद्वयस्य अवकाशार्थम् एकं प्रार्थना पत्रं लिखतु।** **4**

**अथवा**

**भवती नेहा अस्ति । स्वकीयां पलकसखीं प्रति स्वविद्यालयस्य वार्षिकोत्सवविषये अधोलिखितपत्रं मञ्जूषायाः**

BSER

उचितपदानि चित्वा रिक्तस्थानानि पूरयतु ।

| |
|---|
| परिवारसदस्येभ्यः, वार्षिकोत्सवस्य, पत्रोत्तरम् , स्वकरकमलेन, कुशलताम् , विविधाः, नीतवती , पुरस्कारम् |

प्रिये पलकसखि !

नमस्ते ।

अत्र कुशलं तत्रास्तु । अहं भवत्याः(i)................................................ कामये। फरवरीमासे पञ्चमे दिनाङ्के मम विद्यालये(ii)........... आयोजनम् अभवत्। अस्मिन् दिवसे (iii).................................... प्रतियोगिताः अभवन्। अहमपि क्रीडाप्रतियोगितायाम्,वादविवादप्रतियोगितायाञ्च भागं(iv).............................................. । पुरस्कारवितरणसमारोहे अस्माकं क्षेत्रस्य विधायकमहोदयः(v).................................. पुरस्कारवितरणं कृतवान् ।

अहमपि(vi)........................................प्राप्तवती। अस्तु (vii)....................................सर्वेभ्यः यथायोग्यं नमस्काराः। (viii)..................................... शीघ्रमेव प्रेषणीयम्।

भवदीया सखी

नेहा

17. अधःप्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्ट वाक्यानि "उद्यानस्य विषये" लिखत । 4

| |
|---|
| वृक्षाः, गृहाणि , गावः, जलाशयः,हंसाः, पृष्ठतः ,नौका ,बालिका,जलम् ,पुरुषः,स्त्री,नदी |



**अथवा**

मंजूषायाः उपयुक्तपदानि गृहीत्वा मित्रयोः मध्ये क्रीडायाः विषये संवादं पूरयत।

(दास्यामि ,खेलिष्यामि , बहुलाभम्, स्वस्थमनसः, करोति, अधुना , क्रीडनम्, क्रीडांगणे)

RSER

अशोकः - प्रवीण ! भवान् अत्र किं(i)............................ ?

प्रवीणः - हे मित्र ! अहम्(ii)........................ किमपि कार्यं न करोमि।

अशोकः - तर्हि गच्छतु। भवतः मित्राणि तत्र(iii) ............................... क्रीडन्ति, तैः सह क्रीडतु।

प्रवीणः - मह्यं(iv)........................न रोचते । अतः अहं न क्रीडामि।

अशोकः –स्वस्थशरीरस्य(v)................ च कृते क्रीडायाः अस्माकं जीवने महती आवश्यकता भवति।

प्रवीणः- यदि अहं क्रीडायां ध्यानं (vi)................तर्हि मम अध्ययनं बाधितं भविष्यति।

अशोकः - एतद् समीचीनं नास्ति। क्रीडायै स्वल्पसमयम् एव प्रयच्छतु, अल्पसमयः अपि शरीराय(vii)............. प्रदास्यति।

प्रवीणः- आम् मित्र ! अद्य आरभ्य अहं अवश्यं(viii).................. ।

18. अधोलिखितेषु वाक्येषु केषाञ्चित् चतुर्णां वाक्यानां संस्कृतभाषयाम् अनुवादं कुरुत। 4

(i) विद्यालय के पास गाँव है।

(ii) नगर के दोनों ओर राजमार्ग है।

(iii) सुरेश कुत्ते से डरता है।

(iv) हिमालय से गंगा निकलती है।

(v) वह दोनों बाजार जाते हैं।

(vi) वायु के बिना जीवन सम्भव नहीं है।

19. अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखत। 3

1. एकः बुभुक्षितः श्रृगालः भोजनार्थं वने इतस्ततः भ्रमति स्म।

2. लतायाः बहूनि पक्वानि द्राक्षाफलानि आसन्।

3. परं तथापि द्राक्षाफलानि न प्राप्नोत्।

4. एकस्मिन् स्थाने सः द्राक्षालतां पश्यति।

5. एतानि द्राक्षाफलानि अम्लानि इति उक्त्वा कुपितः श्रृगालः ततः गतः ।

6. तानि खादितुं सः बहुवारं प्रयासम् अकरोत् ।

अथवा

अधःमञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन षड् वाक्यानि "वाटिकायाः शोभाविषये" लिखत-

| |
|---|
| जलाशयः, वृक्षाः, पुष्पाणि, भ्रमराः, लताः, पक्षिणः, जनाः, प्रातःकाले, भ्रमन्ति, क्रीडन्ति |

BSER